Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# समावेशात्मकशिक्षासमस्यायै संवैधानिकं प्रावधानम्



जयपालः
शोधच्छात्रः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**Article Info**

Volume 5, Issue 2

Page Number : 120-122

**Publication Issue :**

March-April-2022

**Article History**

Received : 01 March 2022

Published : 17 March 2022

**शोधसारांशः**

समावेशात्मिका शिक्षाः कक्षायां विद्यालये च छात्राणां विविधतायाः स्वीकृतेः एका मनोवृत्तिरस्ति। यस्यां विविधाक्षमाः बालकाः सामान्यशिक्षाप्रणाल्यामेकस्यां कक्षायां सम्मिल्ल्याध्ययनं कुर्वन्ति। अस्यां शिक्षायां प्रतिभासम्पन्नैः सह सामान्याः बाधिताश्च बालकाः एकस्यां कक्षायां पूर्णकालिकीं वा अंशकालिकीं शिक्षामाप्नुवन्ति। अस्यां शिक्षायां याः समस्याः वर्तन्ते, तासां समाधानं संवैधानिकप्रावधानेन भवितुं शक्यते।

सामाजिकस्य न्यायस्य समानतायाश्च सर्वाधिकं महत्त्वपूर्णं साधनं शिक्षेति सर्वैः स्वीक्रियते। शिक्ष् विद्योपादाने इत्यस्माद्धातोः 'गुरोश्च हलः' इति पाणिनिसूत्रेण अ प्रत्ययः कृते सति अजाद्यतष्टाप् इत्यनेन टाप् प्रत्ययः कृते सति प्रातिपदिकत्वात् शिक्षेति शब्दः निष्पद्यते। यस्यार्थो भवति शिक्ष्यते विद्योपादीयते अनयेति शिक्षाया यया विद्यायाः उपादानं ग्रहणं च जायते सा शिक्षेति नाम्नाऽभिधीयते। विद्या इत्यस्य शब्दस्य कृते भगवता पाणिनिना पञ्चधातूणां पाठः कृतः। तद्यथा विद् ज्ञाने, विद् सत्तायाम्, विद्लृ लाभे, विद् विचारणे, विद् चेतनाख्यानमोक्षेषु च। उक्तानां धातूणामाधारेण कथयितुं शक्यते यत् यया ज्ञानं, सत्तावबोधः, लाभः, कर्त्तव्याकर्त्तव्ययोः विवेकः आत्मज्ञानं च जायते सा शिक्षेति कथयितुं शक्यते। वस्तुतस्तु यया मानवः इहलोके ससुखेन जीवनं यापयति एवञ्च अन्ते सत्पुरं प्रति याति सा यथार्था शिक्षा भवति। प्राच्यमनीषायां विद्यायै ऋषिभिः मन्त्रद्रष्टाभिश्च यन्मूललक्ष्यमुद्घोषितं तत्तु 'सा विद्या या विमुक्तये' वा अविद्यया मृत्युर्तीर्त्वा विद्ययामृतमश्नुतेप्यादयश्च वर्तन्ते। पराऽपरेति नाम्नास्यां मनीषायामेषां द्विधा विभक्ताऽस्ति। यया विद्यया वेद-वेदाङ्ग-शस्त्र-लोकाऽभिधीयते। तत्रैव बोधादयश्च जायन्ते सा अपरेति नाम्नाऽभिधीयते। ब्रह्मविष्यकमात्मज्ञानं यया प्राप्यते सा परेति नाम्नाऽभिधीयते।

---

**प्रस्तावना :–**

आंग्लमनीषायामस्याः कृते Education इति शब्दविशेषः प्रयुज्यते। तस्य शब्दस्य उत्पत्तिः लैटिनभाषायाः शब्दत्रयेण तत्र Education, Educare एवञ्च Educere जायते। E तथा च Duco इत्युभाभ्यां शब्दाभ्यां माध्यमेन Education इति शब्दस्य निष्पत्तिर्भवति। E इत्यस्य अर्थो भवति Out of अर्थात् बहिरानयनमेवञ्च Duco इत्यस्य अर्थो भवति To lead forth or to extract out आन्तरिकी शक्तिरिति। अर्थात् मानवेषु विद्यमानानामन्तर्निहितशक्तीनां बाह्यप्रकाशनं यया जायते सा शिक्षेति नाम्नाऽभिधीयते।

संकुचितार्थे एषा शिक्षालयीये वातावरणे वा परिवेशे दीयमाना औपचारिकी शिक्षा भवति तत्रैव व्यापकार्थे जन्मना आरभ्य मृत्युपर्यन्तं या अस्मान् शिक्षयति सा अनौपचारिकी शिक्षा भवति। वस्तुतस्तु प्राच्यमनीषायामस्याः बहूनि निर्वचनानि शिक्षाविज्ञैः प्रदत्तानि सन्ति। यथा आचार्येण सायणेन ऋग्वेदभाष्यभूमिकायां निगदितं यत्- वर्णस्वराद्युच्चारणप्रकारत्रयोपदिष्यते सा शिक्षोच्यते।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

विषयेऽस्मिन् जगद्गुरुशंकराचार्येण निगदितं यत् - शिक्षाऽऽत्मानुभूतिरस्ति। विवेकानन्दस्य मते मानवन्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षोच्यते। तथा च विषयेऽस्मिन् डॉ- सर्वपल्लीराधाकृष्णन् महोदयस्य विचारोऽस्ति यत् - मानवसमाजयोः निर्माणमेवञ्च उभयोः समुचितः विकासः यया जायते सा शिक्षेति नाम्नाऽभिधीयते।

शिक्षायै पाश्चात्यमनीषायां यानि निर्वचनानि प्राप्यन्ते तेषु मुख्यानि निम्नलिखितानि सन्ति। यथा - अरस्तुमते स्वस्थ्ये शरीरे स्वस्थ्यस्य मनः निर्माणमेव शिक्षोच्यते। प्लेटो मते शरीरात्मनोः पूर्णतां प्रति प्रेरणाप्रदानमेव शिक्षा भवति, तथैव सुकरातमते मानवस्य मनसि अमूर्तत्वेन विद्यमानानां युक्तायुक्तसार्वभौमिकविचाराणं बाह्यप्रकाशनं यया जायते सा शिक्षोच्यते।

अर्वाचीनेऽस्मिन् काले सर्वेभ्यः भारतीयेभ्यः मूलाधिकारत्वेन शिक्षाधिकारः 2009 तमे वर्षे संविधानेन प्राप्तोऽस्ति। स्वतन्त्रतायाः सप्ततिवर्षानन्तरमपि 2011 इत्यस्य जनगणनानुसारेण अष्टाविंशतिप्रतिशताः (28%) जनाः अस्माकं देशे निरक्षराः वर्तन्ते। तेषु निरक्षरेषु 3-20 लक्षपरिमिताः जनाः विभिन्नेभ्यः बाधितप्रारूपेभ्यः बाधिताः सन्ति। अस्मद्देशीयाः सर्वे जनाः शिक्षायाः समानावसरैः लाभान्विताः भवेयुः एतदर्थं केन्द्रीय-रज्यकीय-असर्वकारीयसंस्थाभिश्च देशस्य सर्वेषु भागेषु शिक्षायाः प्रचार-प्रसारेण सह तस्याः सम्यग् व्यवस्थापनमपि क्रियते। तत्रैव येन केनापि कारणेन दिव्याङ्गाः, असमर्थाः, बाधिताः, अक्ष्माश्च जना अपि भारतीयाः नागरिकाः भवन्ति। तेऽपि शिक्षाधिकारैः लाभान्वितो भूत्वा शिक्षायाः समानावसराः प्राप्नुयुः। इत्यस्य कृते प्राच्यैः पाश्चात्यैश्च सामान्यविशेष्टयोरुभयोः पक्षः शिक्षायाः स्वीकृत्य अल्पबाधितेभ्यः बालकेभ्यः शिक्षायाः एकं वैकल्पिकं स्वरूपं संरचितम्। तद्रूपमेव अर्वाचीनेऽस्मिन् काले शिक्षा समाजे समावेशात्मकशिक्षेति नाम्नाऽभिधीयते। समावेशात्मकशिक्षायां सामान्यैः सह शारीरिक-मानसिक-सामाजिक-सांवेगिक-शैक्षिकरूपैश्च बाधितेभ्यः बालकेभ्यः शिक्षाऽऽयोज्यते। अर्थादस्यां शिक्षायां प्रतिभासम्पन्नाः सामान्याः बाधिताश्च सर्वे बालकाः परस्परं सम्मिल्य एकस्यां कक्षायां वा विद्यालये सम्यक्समायोजनेन शिक्षामाप्नुवन्ति। समायोजनमिदं शैक्षिकं सामाजिकं सांवेगिकं मानसिकं शारीरिकं वा भवितुमर्हन्ति। वस्तुतस्तु प्रचलितायां शिक्षायां मुख्यधारायां सामान्यैस्सह तादृशाः बाधिता अपि शिक्षामाप्नुवन्ति। अस्यां तेभ्यः बाधितेभ्यः सामान्ये स्वतन्त्रे च वातावरणे विशिष्टोपकरणैः विभिन्नाधिगमव्यूहैः शिक्षायाः व्यवस्थापनं क्रियते। एषा सामान्यैः सह बाधितानामपि एकस्मिन्नेव वातावरणं शिक्षां प्रति संकेतयति। विषयेऽस्मिन् स्टीफनब्लैकहर्ट इत्युभाभ्यामाचार्याभ्यां निगदितं यत् शिक्षायाः मुख्यधारायाः अर्थोऽस्ति यत् बाधितानां बालकानां सामान्यकक्षायां शिक्षायाः व्यवस्थापनम्। अस्य सामानावसरस्य आधारः दार्शनिकं चिन्तनमस्ति। येन वैयक्तिकयोजनाभिः सामाजिकं मानकीकरणेन सह अधिगमः संवर्धते।

एषा सामावेशात्मिकाशिक्षा बाधितानां बालकानां च कृते विद्यालये विभिन्नानां शैक्षिक-सामाजिक-सांवेगिक-व्यावसायिकानां शिक्षाकार्यक्रमाणां माध्यमेन सर्वाङ्गीणविकासं करोति। तथा च सामान्याः विशिष्टावयबालकाः परस्परं निकषामनुभूय सहयोगभावनां संवर्धयन्ति एवञ्च समानावसरमाप्नुवन्ति। वस्तुतस्तु सर्वे बालकाः प्रायशः स्वाभाविकरूपेण अधिगमार्थमभिप्रेरिताः भवन्ति। अनुभवेन, अनुकरणेन, चर्चया, सप्रश्नेन, श्रवणेन, चिन्तनेन, मननेन, क्रीडया, क्रियाकलापैश्च परस्परं बालकाः परिवेशस्य विषये सूचनामाप्नुवन्ति। एतदर्थं सर्वेभ्यः सामान्येभ्यस्सह बाधितेभ्यः बालकेभ्यः अधिगमार्थमवसरप्रदानमावश्यकं भवति।

अस्याः समावेशात्मकशिक्षायाः सम्यगर्थावबोधनाय अस्याः याः चतस्रः प्रक्रियायाः तत्र मानकीकरणम्, संस्थारहितशिक्षा, शिक्षायाः मुख्यधारा, समावेशश्च ज्ञानं महत्त्वपूर्णं भवति। एषा न विशिष्टा, न च एकीकृता, अपितु उभयो समन्वितं भवति।

26 जनवरी 1950 तमे वर्षे अस्माकं देशे संविधानस्य प्रावधानमारब्धम्। यस्मिन् संविधाने समानता-स्वतन्त्रता-सहभागिता-सामाजिकन्यायार्थकाः अनेके अनुच्छेदाः अधिनियमाश्च विनिर्मित अभवत्। एषु अनुच्छेदेषु अधिनियमेषु केचन् अनुच्छेदाः अधिनियमः तादृशानां बालकानां कृते वर्तन्ते ये केनाऽपि कारणेन वंचिताः बाधिताः वा दिव्याङ्गाः सन्ति। तद्यथा -

अनुच्छेदे 14 तमे - संविधानस्य 14 तमे निगदितास्सन्ति यत् नियमोपनियमे भारतीयाः सामान्याः बाधिताश्च सर्वे समानाः भवन्ति एवञ्च सर्वेभ्यः समानं संरक्षणमस्मिन् वर्तन्ते।

अनुच्छेदः 15-16 तमे इत्यस्यानुसारेण धर्म-मूल-वंश-लिङ्ग-जाति-जन्मस्थानाधारेण च वा उक्तेषु एकाधारेण संविधानं भेदभावं निषेधयति। 16 तमे अनुच्छेदः सार्वजनिकं वृत्तौ सामानावसरस्य प्रदानेन सह धर्म-वर्ण-जाति-लिङ्ग-वंश-जन्मस्थानाधारेण च केनापि सह भेदभावमवरोधयति।

41 तमे अनुच्छेदे प्रावधानमस्ति यत् राज्यः स्वार्थिकक्षमताधारेण तेभ्यः शिक्षाप्राप्त्यर्थमर्थसहयोगस्य प्रबन्धनं करिष्यति।

46 तमे अनुच्छेदे दुर्बलानां विशिष्टानामनुसूचितजाति-जनजातीनां हिताय समृद्धये च सामाजिकन्यायेभ्यः शोषणेभ्यः संरक्षणस्य प्रबन्धनं राज्येन करिष्यते। शारीरिकरूपेण बाधितेभ्यः जनेभ्यः सामानावसराय सामाजिकसहभागितायै नागरिकाधिकारस्य संरक्षणाय च 1995 तमे वर्षे भारतसर्वकारस्य विधि (कानून) मन्त्रलयेन एकः अधिनियमः प्रस्तावितः। यस्य क्रियान्वयनं जनवरीमासस्य एक दिनाङ्के 1996 तमे वर्षे अभवत्। अस्य

अधिनियमस्य भागद्वयमस्ति। तत्र प्रथमे भागे वा धारासंख्या एका इत्यस्यां समावेशात्मकशिक्षायै कानिचन संवैधानिकानि प्रावधानानि निरूपितानि सन्ति। तद्यथा 'अ' मध्ये प्रावधानम् -

उपयुक्ताधिकारिणः केन्द्रीयाः स्थानीयाश्च निम्नलिखितायाः कार्ययोजनाश्च निर्माणं करिष्यन्ति। तद्यथा-

1- अष्टादशवर्षं यावत् शारीरिकरूपेण बाधितेभ्यः बालकेभ्यः बालिकाभ्यश्च कृते सम्यग्वातावरणे निःशुल्कशिक्षायाः एवञ्च शिक्षासंस्थाने प्रवेशं सुनिश्चितं करिष्यन्ति।
2- सामान्यविद्यालयेषु सामान्यबाधितयोः इत्युभयोः समन्वयनाय यत्नं अधिकारिणश्च करिष्यन्ति।
3- सर्वकारीय-असर्वकारीय इत्युभावपि क्षेत्रे समावेशात्मकशिक्षासंस्थानस्य संगठने बलं प्रदास्यन्ति। येन तेषां समेषां बाधितानां विद्यालये प्रवेशः सुनिश्चितो भवेत्।
4- शारीरिकरूपेण बाधितेभ्यः बालकेभ्यः व्यवसायिकशिक्षणाय संविधानानां विशिष्टिशिक्षासंस्थानामपि अधिकारिणः विधास्यन्ति।

'ब' इत्यस्यामुपयुक्तावुभावपि अधिकारिणः विज्ञापनेन निम्नलिखितानां कार्यक्रमाणां योजनां निर्माष्यन्ति।

1- शारीरिकरूपेण ये अक्षमाः वा बाधिताः बालकाः, ये कक्षा पञ्च यावत् यस्यां कस्यामपि संस्थायां शिक्षां प्राप्तवन्तः एवञ्च केनापि कारणेन पूर्णकालिकीं शिक्षां त्यक्तवन्तः। तादृशेभ्यः बालकेभ्यः अंशकालिकी शिक्षायाः व्यवस्थापनं विधास्यन्ति।
2- षोडशवर्षीयेभ्यः वा तदधिकेभ्यः बालकेभ्यः व्यावहारिकीशिक्षायाः एवञ्च साक्षरतासम्पादनार्थं शिष्टिांशकालिकशिक्षायाः व्यवस्थापनं विधास्यन्ति।
3- अविकसितेषु क्षेत्रेषु यथोपलब्धमानवसंसाधनस्य प्रयोगं कृत्वा उपयुक्ताभिः विन्यासकार्यक्रमाणां संयोजनं नियमानुगुणं ते विधास्यन्ति।
4- तेभ्यः वंचितेभ्यः बाधितेभ्यश्च युक्तविद्यालयेन वा मुक्तविश्वविद्यालयेन शिक्षाप्रदानम्।
5- विद्युतोपकरणैः वा अन्यमाध्यमेन कक्षायां विचारविमर्शयोः सम्पादनम्।
6- सर्वेभ्यः असमर्थेभ्यः शिक्षायै आवश्यकोपकरणानां वितरणम्।

एतानतिरिच्य मानवाधिकारः बालाधिकारः पुनर्वासपरिषदश्च तेषामधिकारसंरक्षणेन सह शिक्षायाः प्रबन्धनं करिष्यन्ति।

संविधानानुसारेण दिव्याङ्गानां बाधितनामक्षमनामसमर्थानाञ्चाधिकारः सामान्यनागरिक इवास्ति। गत्यात्मकेन संविधानेनापि अस्माकं देशे तादृशानां दशा समीचीना नास्ति। अस्य मूलमस्माकं समाजस्य रूढ़ता-कुरीति-कुप्रथा-अविश्वासदयश्च वर्तन्ते। यैः समाजेऽस्मिन् जन्मप्राप्त्वादपि एतादृशाः बालकाः समाजात् पृथक्भूताः भवन्ति। एभ्यः समानोत्तरदायित्वस्य निर्वहणेन अस्माकं राष्ट्रस्य सर्वाङ्गीणविकासः भवितुमर्हति।

वस्तुतस्तु समावेशात्मकशिक्षया न केवलं तेषां लोकतान्त्रिकसहभागितायाः संरक्षणं जयते अपितु अनया सामाजिकजीवनयापनाय तेषु विश्वाससंवर्धनमपि कर्तुं शक्यते।

## सन्दर्भग्रन्थसूचि-


1. सामान्वयक- वर्मा, प्रसाद डेंकेश्वर, साव हेमन्तकुमार, विविधता, पुस्तक का नाम-''समावेशी शिक्षा और जेण्डर'', प्रकाशक- राज्यशैक्षिक अनुसन्धान और प्रशिक्षण परिषद्, छत्तीसगढ़, रायपुर, वर्ष- 2018, संस्करण प्रथम।
2. झांर्मणडा वाचस्पतिनाथः, पोद्दार पब्लिकेशन, तारानगर कालोनी, धित्तूपुर, बी.एच.यू. वाराणसी- 221005, वर्षे- 2015, संस्करण-1
3. गुप्ता, डॉ. एस.पी. गुप्ता. डॉ. अलका, उच्चतर शिक्षा मनोविज्ञान, शारदा पुस्तक भवन, 11, युनिवर्सिटी रोड़, इलाहबाद-2 वर्ष-2014, नवीन संस्करण
4. झा 'मणि' डॉ. वाचस्पतिनाथः, चैबे अनुजकुमारः, शिक्षामंजुषा द्वितीयवर्षः, पोद्दार पब्लिककेशन, तारानगर कलोनी, छित्तूपुर, बी. एच्. यू. वाराणसी, 221005, वर्ष- 2019, संस्करण प्रथम।
5. पाण्डेय डॉ. रामशकल, मिश्र डॉ. करुणाशंकर, भारतीय शिक्षा की सम सामयिक समस्याएँ, अग्रवाल पब्लिकेशन्स, आगरा, वर्ष- 2007-08, संस्करण तृतीय।